# .. achyutAShTakaM ..

## ॥ अच्युताष्टकं ॥

अच्युतं केशवं रामनारायणं  कृष्णदामोदरं वासुदेवं हरिम् ॥
श्रीधरं माधवं गोपिकावल्लभं  जानकीनायकं रामचन्द्रं भजे ॥ १॥
अच्युतं केशवं सत्यभामाधवं  माधवं श्रीधरं राधिकाराधितम् ॥
इन्दिरामन्दिरं चेतसा सुन्दरं  देवकीनन्दनं नन्दनं संदधे ॥ २॥
विष्णवे जिष्णवे शङ्खिने चक्रिणे  रुक्मिनीरागिणे जानकीजानये ॥
वल्लवीवल्लभायाऽर्चितायात्मने  कंसविध्वंसिने वंशिने ते नमः ॥ ३॥
कृष्ण गोविन्द हे राम नारायण  श्रीपते वासुदेवाजित श्रीनिधे ॥
अच्युतानन्त हे माधवाधोक्षज  द्वारकानायक द्रौपदीरक्षक ॥ ४॥
राक्षसक्षोभितः सीतया शोभितो  दण्डकारण्यभूपुण्यताकारणः ॥
लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम् ॥ ५॥
धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां  केशिहा कंसहृद्वंशिकावादकः ॥
पूतनाकोपकः सूरजाखेलनो  बालगोपालकः पातु माम् सर्वदा ॥ ६॥
विद्युदुद्द्योतवानप्रस्फुरद्वाससं  प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम् ॥
वन्यया मालया शोभितोरःस्थलं  लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥ ७॥
कुञ्चितैः कुन्तलैर्भ्राजमानाननं  रत्नमौलिं लसत् कुण्डलं गण्डयोः ॥
हारकेयूरकं कङ्कणप्रोज्ज्वलं  किङ्किणीमञ्जुलं श्यामलं तं भजे ॥ ८॥
अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् ।
वृत्ततः सुंदरं कर्तृ विश्वंभरं तस्य वश्यो हरिर्जायते सत्वरम् ॥ ९॥
॥ इति श्रीशंकराचार्यविरचितमच्युताष्टकं संपूर्णम् ॥

Encoded and proofread by Girish Beehary

Please send corrections to sanskrit@cheerful.com
Last updated May 1, 2011
http://sanskritdocuments.org